Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ सन्तानकरयन्त्रप्रसङ्गात् यन्त्रसारोक्तं सन्तानकरं पुरुषसूक्तयन्त्रमप्यत्र लिख्यते —

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनषडर्णं च षट्सु कोणेषु सन्धिषु ॥

तदङ्गानि चतुष्पत्रकेसरेषु क्रमेण च ।
गोपालकंचतुर्वर्णमन्त्रस्यैकैकमक्षरम् ॥

दलेषु द्वादशार्णस्य त्रीणि त्रीण्यक्षराणि च ।
अष्टपत्रे केसरोद्यदष्टार्णैकैकवर्णके ॥

नृसिंहानुष्टुभो वर्णान् चतुरश्चतुरस्ततः ।
सुदर्शनत्र्यष्टवर्णं केसरे षोडशच्छदे ॥

ऋचां पुरुषसूक्तस्य क्रमात् षोडशकं बहिः ।
मातृकार्णोल्लसद्वृत्तं भूपुराश्रस्थतारकम् ॥

यन्त्रं पुरुषसूक्तस्य पुत्रायुःकीर्तिकान्तिदम् ।
सर्वपापहरं श्रीदं धर्मार्थसुखमोक्षदम् ॥

हय्यङ्गवीने प्रविलिख्य यन्त्रं त्रिवारमेतत्प्रतिजप्य सूक्तम् ।
प्रातस्समद्याद्वनिता विदग्धं पुत्रं प्रसूते कमलाक्षतुल्यम् ॥

घोरे विषे घोरतरेभिचारे घोरे ज्वरे घोरतरे च शूले ।
हय्यङ्गवीने प्रविलिख्य यन्त्रं प्रभक्षयेत्तत्प्रशमाय जप्त्वा ॥

अस्यार्थः — प्रथमं षट्कोणं विलिख्य तन्मध्ये प्रणवं विलिख्य, तन्मध्ये साध्यनामादियन्त्रन्यायान् विलिखेत् । पुनः सहस्रार हुं फडिति सुदर्शनषडर्णान् षट्सु कोणेषु विलिखेत् । पुनः कोणद्वन्द्वान्तरालेषु आचक्राय

स्वाहा हृदयाय नमः । विचक्राय स्वाहा शिरसे स्वाहा । सुचक्राय स्वाहा शिखायै वषट् । धीचक्राय स्वाहा कवचाय हुम् । संचक्राय स्वाहा नेत्रत्रयाय वौषट् । ज्वालाचक्राय स्वाहा अस्त्राय फट् । इत्येतानि सुदर्शनषडङ्गानि विलिखेत् । पुनस्तद्बहिः चतुर्दळं पद्मं विलिख्य, तत्केसरेषु "क्लीं कृष्ण क्लीं" इति गोपालक(मन्त्र)चतुर्वर्णान् विलिखेत् । पुनस्तद्दळमध्येषु, "ओं नमो भगवते वासुदेवाय" इति द्वादशाक्षरमन्त्रस्य त्रीणि त्रीण्यक्षराणि विलिखेत् । पुनस्तद्बहिरष्टपत्रं पद्मं विलिख्य, तत्केसरेषु, "ओं नमो नारायणाय" इत्यष्टाक्षरस्य एकैकमक्षरं विलिखेत् । पुनस्तद्दळमध्ये,

'उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥"

इति नृसिंहद्वात्रिंशदर्ण(मन्त्र)स्य चतुरश्चतुरोक्षरान् विलिखेत् । पुनस्तद्बहिः षोडशपत्रं विलिख्य तत्केसरेषु "ओं नमो भगवते महासुदर्शनाय हुंफट्" इति सुदर्शनषोडशाक्षरस्यैकैकमक्षरं विलिखेत् । पुनस्तद्दळमध्ये ऋग्वेदोक्तपुरुषसूक्तस्य षोडश ऋचः क्रमेण षोडशदळेषु विलिखेत् । तद्बहिर्वृत्तं विलिख्य तस्मिन्मातृकावर्णैर्वेष्टयेत् । पुनस्तद्बहिः चतुरश्रं विलिख्य तत्कोणेषु प्रणवं विलिखेत् । एवं नवनीते विलिख्य षोडशसहस्रसंख्यं सूक्तं जपित्वा वनितां प्राशयेत् । तस्मात्पुत्रं प्रसूते । अथवा ज्वरग्रस्तं वा आभिचारग्रस्तं वा शूलव्याधिग्रस्तं वा एवं विलिख्य जप्त्वा प्राशयेत् । तच्छान्तिर्भविष्यति ॥

अथ प्रसङ्गात् ऋग्विधानोक्तप्रकारेण पुरुषसूक्तेन सन्तानयागविधिर्लिख्यते —

सहस्रशीर्षेति षोडश(ऋचां) नारायणऋषिः । अनुष्टुप् छन्दः । भगवान्पुरुषो देवता ।

सहस्रशीर्षेतिसूक्तं त्रिवारं च दिनेदिने ।
विष्ण्वादिसर्वदेवानां सर्वार्चनफलं लभेत् ॥

त्रिवारं जपेदित्यर्थः ॥

शुक्लपक्षे शुभे वारे शुभनक्षत्रगोचरे ।
द्वादश्यां पुत्रकामस्तु चरुं कुर्वीत वैष्णवम् ॥

विष्णवे त्वा जुष्टं निर्वपामीत्यनेन प्रकारेणेत्यर्थः ।

दम्पत्योरुपवासस्स्यादेकादश्यां शिवालये ।
ऋग्भिष्षोडशभिस्सम्यगर्चयित्वा जनार्दनम् ॥

दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
पूजितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥

चरुं पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया ।
प्राप्नुयाद्वैष्णवं सूनुमचिरात्सन्ततिक्षमम् ॥

द्वादश्यां सम्यक्पयसा निर्वपेद्वैष्णवं चरुम् ।
यः करोति सहस्रं वा याति विष्णोः परं पदम् ॥

होममिति शेषः । अयं होमः सन्तानार्थं न भवति । पुनः,

हुत्वाऽग्निं विधिवद्भक्त्या ऋग्भिष्षोडशभिर्बुधः ।
कृताञ्जलिपुटो भूत्वा स्तुवन्नाशीः प्रयोजयेत् ॥

अस्त्यत्रोपदेशः । प्रथमं षोडशभिः ऋग्भिः आज्याहुतिं हुत्वा, पुनस्ताभिः पक्वाहुतिं च कृत्वा पुनरप्याज्याहुतिं कुर्यादित्यर्थः ।

समिधोऽश्वत्थप्लक्षस्य हुत्वाऽज्यं जुहुयात्पुनः ।
उपस्थाय हुताशस्य ध्यात्वार्च्य मधुसूदनम् ॥

हविर्होमं ततः कुर्यात् प्रत्यृचं वाग्यतश्शुचिः ।
सूक्तेन जुहुयादाज्यं हविश्शेषं तु पूर्ववत् ॥

पूर्ववदवदाय स्विष्टकृद्धोमं कुर्यादित्यर्थः ।

अस्त्यत्रोपदेशः । अश्वत्थसमिधः षोडशभीऋग्भिर्हुत्वा एकैकहोमानन्तरं तत्तदृग्जपपूर्वकं अश्वत्थपत्रषोडशकं क्रमेण पुरतो निधाय पुनराज्याहुतिसमयेऽपि एकैकाहुत्यनन्तरं तत्तदृग्जपपूर्वकं तेषु पत्रेषु संपातं च गृहीत्वा, पुनश्चरुहोमसमयेपि तथैव संपातं गृहीत्वा, आज्यहोमसमयेपि तथैव गृह्णीयात् । तदुपरि च षोडशपत्रैराच्छादयेदित्यर्थः ॥

हविश्शेषं नमस्कृत्वा नारी नारायणं पतिम् ।
भक्षयित्वा हविश्शेषं लब्ध्वाशीस्संविशेत् क्षपाम् ॥

अस्त्यत्रोपदेशः । आचार्यस्तु नारीं पुरुषसूक्तन्यासादिकं कारयित्वा अश्वत्थपत्रस्थं संपातमेकैकऋग्जपपूर्वकं अश्वत्थपत्रेणैव तस्या आस्ये विनिक्षिपेत् । पुनस्संपातपिधायकाश्वत्थपत्रैर्जलानुपानं च एकैकऋग्जपपूर्वकं दद्यादित्यर्थः ।

ततः कृत्वा त्विदं कर्म कर्तव्यं द्विजतर्पणम् ।
द्वितीया स्त्री निवर्तेत या च गर्भं न विन्दति ॥

अपुत्रा मृतपुत्रा वा या च कन्यां प्रसूयते ।
क्षिप्रं सा जनयेत्पुत्रं ऋश्यशृङ्गो यथाब्रवीत् ॥

इत्थं ऋग्विधाने प्रोक्तः ॥

अथ पुरुषसूक्तपूजाविधिः—

आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययाऽऽसनं दद्यात् पाद्यं चैव तृतीयया ॥

चतुर्थ्यार्घ्यं प्रदातव्यं पञ्चम्याऽऽचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥

यज्ञोपवीतमष्टम्या नवम्या गन्धमेव च ।
दशम्या पुष्पदानं स्यादेकादश्या च धूपकम् ॥

द्वादश्या च तथा दीपं त्रयोदश्या चरुं तथा ।
चतुर्दश्याञ्जलिं कृत्वा पञ्चदश्या प्रदक्षिणम् ॥

षोडश्योद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् ।
एवं पुरुषसूक्तपूजाविधिस्समाप्तः ॥

अथ न्यासविधिः –

ॐ नारायण ऋषिः । अनुष्टुप् छन्दः । पुरुषो देवता । अतो देवा अवन्तु नः ॐ भूः पुरुषाय नमः हृत् । इदं विष्णुर्विचक्रमे ॐ भुवः पुरुषाय नमः शिरः । त्रीणि पदा विचक्रमे ॐ सुवः पुरुषाय नमः शिखा । विष्णोः कर्माणि पश्यत ॐ महः पुरुषाय नमः कवचम् । तद्विष्णोः परमं पदं ॐ जनः पुरुषाय नमः नेत्रत्रयाय । तद्विप्रासो विपन्यवः ऋक् सर्वत्र ॐ भूर्भुवस्सुवः सत्यपुरुषाय नमः अस्त्रम् ॥ इति ॥ ध्यानम्—

गोक्षीराभं पुण्डरीकासनस्थं चक्राब्जाढ्यं शङ्खकौमोदकीभ्याम् ।
श्रीभूमिभ्यामर्चितं योगनिष्ठं ध्यायेदेवं पूजयेत्पूरुषेण ॥

अथ न्यासः– वामाङ्गाद्यं करचरणजानूरुयुग्मेषु नाभौ
हृत्कण्ठांसद्वितयवदनाक्ष्युत्तमाङ्गेषु मन्त्री ।

सप्ताक्षीत्येकमेव स्थानम् । एवं षोडशभिः ऋग्भिर्न्यसेत् । स एष संहृतिन्यासः ॥ एतद्विपरीतस्थानेन सृष्टिन्यासः ॥ नाभावारभ्य करान्तं न्यस्त्वा, शिखाभिश्शिरआदिहृदन्तं न्यसेत् । एष स्थितिन्यासः ॥